| | |
|---|---|
| छेषं तु यद् दक्षिणतोऽयनस्य । | cheṣaṃ tu yad dakṣiṇato:'yanasya \| |
| तद् एकषष्ट्या द्विगुणं विभक्तं | tad ekaṣaṣṭyā dviguṇaṃ vibhaktaṃ |
| सद्वादशं स्याद् दिवसप्रमाणम् ॥२२॥ | sadvādaśaṃ syād divasapramāṇam \|\|22\|\| |
| यद् अर्धं दिनभागानां सदा पर्वणि पर्वणि । | yad ardhaṃ dinabhāgānāṃ sadā parvaṇi parvaṇi \| |
| ऋतुशेषं तु तद् विद्यात् संख्याय सहपर्वणाम् ॥२३॥ | ṛtuśeṣaṃ tu tad vidyāt saṃkhyāya sahaparvaṇām \|\|23\|\| |
| इत्य् उपायसमुद्देशो भूयोऽप्य् अह्नः प्रकल्पयेत् । | ity upāyasamuddeśo bhūyo:'py ahnaḥ prakalpayet \| |
| ज्ञेयराशिगताभ्यस्तं विभजेत् ज्ञानराशिना ॥२४॥ | jñeyarāśigatābhyastaṃ vibhajet jñānarāśinā \|\|24\|\| |
| अग्निः प्रजापतिः सोमो रुद्रोऽदितिर् बृहस्पतिः । | agniḥ prajāpatiḥ somo rudro:'ditir bṛhaspatiḥ \| |
| सर्पाश् च पितरश् चैव भगश् चैवार्यमापि च ॥२५॥ | sarpāś ca pitaraś caiva bhagaś caivāryamāpi ca \|\|25\|\| |
| सविता त्वष्टाथ वायुश् चेन्द्राग्नी मित्र एव च । | savitā tvaṣṭātha vāyuś cendrāgnī mitra eva ca \| |
| इन्द्रो निरृर्तिर् आपो वै विश्वेदेवास् तथैव च ॥२६॥ | indro nirṛtir āpo vai viśvedevās tathaiva ca \|\|26\|\| |
| विष्णुर् वसवो वरुणोऽज एकपात् तथैव च । | viṣnur vasavo varuṇo:'ja ekapāt tathaiva ca \| |
| अहिर्बुध्न्यस् तथा पूषा अश्विनौ यम एव च ॥२७॥ | ahirbudhnyas tathā pūṣā aśvinau yama eva ca \|\|27\|\| |
| नक्षत्रदेवता एता एताभिर् यज्ञकर्मणि । | nakṣatradevatā etā etābhir yajñakarmaṇi \| |
| यजमानस्य शास्त्रज्ञैर् नाम नक्षत्रजं स्मृतम् ॥२८॥ | yajamānasya śāstrajñair nāma nakṣatrajaṃ smṛtam \|\|28\|\| |
| इत्य् एवं मासवर्षाणां मुहूर्तोदयपर्वणाम् । | ity evaṃ māsavarṣāṇāṃ muhūrtodayaparvaṇām \| |
| दिनर्त्वयनम् आसाङ्गं व्याख्यानं लगधोऽब्रवीत् ॥२९॥ | dinartvayanam āsāṅgaṃ vyākhyānaṃ lagadho:'bravīt \|\|29\|\| |
| सोमसूर्यस्तृचरितं लोकं लोके च सम्मतिम् । | somasūryastṛcaritaṃ lokaṃ loke ca sammatim \| |
| सोमसूर्यस्तृचरितं विद्वान् वेदविद् अश्नुते ॥३०॥ | somasūryastṛcaritaṃ vidvān vedavid aśnute \|\|30\|\| |
| विषुवं तद्गुणं द्वाभ्यां रूपहीनं तु षड्गुणम् । | viṣuvaṃ tadguṇaṃ dvābhyāṃ rūpahīnaṃ tu ṣaḍguṇam \| |
| यल् लब्धं तानि पर्वाणि तथार्धं सा तिथिर् भवेत् ॥३१॥ | yal labdhaṃ tāni parvāṇi tathārdhaṃ sā tithir bhavet \|\|31\|\| |
| माघशुक्लप्रवृत्तस्य पौषकृष्नसमापिनः । | māghaśuklapravṛttasya pauṣakṛṣnasamāpinaḥ \| |
| युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते ॥३२॥ | yugasya pañcavarṣasya kālajñānaṃ pracakṣate \|\|32\|\| |
| तृतीयां नवमीं चैव पौर्णमासीम् अथासिते । | tṛtīyāṃ navamīṃ caiva paurṇamāsīm athāsite \| |
| षष्ठीं च विषुवान् प्रोक्तो द्वादशीं च समं भवेत् ॥३३॥ | ṣaṣṭhīṃ ca viṣuvān prokto dvādaśīṃ ca samaṃ bhavet \|\|33\|\| |
| चतुर्दशीम् उपवसथस् तथा भवेद् | caturdaśīm upavasathas tathā bhaved |
| यथोदितो दिनम् उपैति चन्द्रमाः । | yathodito dinam upaiti candramāḥ \| |
| माघशुक्लाह्निको युङ्क्ते श्रविष्ठायां च वार्षिकीम् ॥३४॥ | māghaśuklāhniko yuṅkte śraviṣṭhāyāṃ ca vārṣikīm \|\|34\|\| |
| यथा शिखा मयूराणां नागानां मणयो यथा । | yathā śikhā mayūrāṇāṃ nāgānāṃ maṇayo yathā \| |
| तद्वद् वेदाङ्गशास्त्राणां ज्योतिषं मूर्धनि स्थितम् ॥३५॥ | tadvad vedāṅgaśāstrāṇāṃ jyotiṣaṃ mūrdhani sthitam \|\|35\|\| |

https://www.culturavedica.org/